MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

The Conformity of Vyāyoga Characteristics in Kālidāsaḥ of Nityānanda Smṛtitīrtha

नित्यानन्दस्मृतितीर्थविरचिते 'कालिदासः' रूपके व्यायोगलक्षणसङ्गतिः

Anup Mondal

State Aided College Teacher, Dept. of Sanskrit
Panskura Banamali College (Autonomous),
Panskura R.S., Purba Medinipur, West Bengal, India.
Research Scholar, Dept. of Sanskrit Sahitya
Kumar Bhaskar Varma Sanskrit and Ancient Studies University
Namati, Nalbari, Assam, India.
Email: anupmondal.hakola@gmail.com
Page No: 75-79

Abstract: *Nityananda Smrititirtha is a distinguished author of modern Sanskrit literature. He was born in 1923 in the village of Sarulia, located in the Jessore district of Bangladesh. His father was Ramgopal Mukhopadhyay, and his mother was Dinatarini Devi. He served as the leading figure of the Howrah Sanskrit Sahitya Samaj. He authored numerous works, among which the 'Vyayoga' titled 'Kalidasa' is particularly significant. This 'Vyayoga' consists of eight scenes and is based on the well-known legend of Kalidasa. This essay examines the extent to which the characteristics of a 'Vyayoga' as defined by Vishvanatha—are appropriately applied in this work.*

Keywords: *Nityananda Smrititirtha, 'Kalidasa' Vyayoga, Mahakavi Kalidasa.*

भूमिका—

आधुनिकसंस्कृतसाहित्यगगने नक्षत्रमिव रवीयते श्रीनित्यानन्दस्मृतितीर्थः। १९२३ संवत्सरे वांलादेशस्य यशोहरमण्डलान्तर्गतस्य सारुलियाग्रामे एकस्मिन् सुशिक्षितपरिवारे नित्यानन्दस्मृतितीर्थः आविर्बभूव। परन्तु परवर्तिनि काले स हाओडामण्डले अवसत्। तस्य पितुर्नाम रामगोपाल-मुखोपाध्यायः। असौ संस्कृताध्यापकः आसीत्। 'कोडारवागान-चतुष्पाठी' इत्यत्र स पाठदानमकरोत्। आसीत् दीनतारिणी देवी तस्य माता। शैशवात् मातुः प्रभावात् पारिवारिक-ऐतिह्यपालनाय नित्यानन्देन संस्कृतशिक्षा अधिगता।

आसीत् स व्याकरण-काव्य-स्मृतिशास्त्रेषु निष्णातः। कोडारवागान-चतुष्पाठी परवर्तिनि काले 'रामगोपाल-चतुष्पाठी' इति नाम्ना ख्यातोऽभवत्। आदौ तावत् नित्यानन्दः पित्रा सह चतुष्पाठ्यां पाठदानमकरोत्। ततः १९५६ संवत्सरे नवद्वीपस्य टोलविभागे मुग्धबोधव्याकरणस्य अध्यापकः आसीत्। पुनः स १९५६ संवत्सरे एव कलिकातायां संस्कृतमहाविद्यालयस्य टोलविभागे व्याकरणस्य अध्यापकरूपेण नियुक्तोऽभवत्।

संस्कृतस्य प्रचाराय प्रसाराय च वङ्गीयशिक्षापरिषदः परिचालकरूपेण स योगदानमकरोत्। आसीत् स हाओडा-संस्कृतसाहित्यसमाजस्य कर्णधारः। संस्कृतभाषां प्रति प्रीतिवशादेव तेन प्रतिष्ठानमिदं प्रतिष्ठितम्। संस्कृतसाहित्ये विशेषावदानाय नित्यानन्दमहोदयः राष्ट्रपतिपुरस्कारेण सम्मानितोऽभवत्। २००८ संवत्सरे महापुरुषस्यास्य तिरोधानमभवत्।

सप्त महाकाव्यानि, षडधिकैकशतं नाटकानि, चतुर्विंशतिः खण्डकाव्यानि, विविधानि संस्कृत-वङ्गीयगीतानि, शोधपत्राणि चेत्यादीनि नित्यानन्दस्मृतितीर्थेन विरचितानि। तद्विरचितानि षडधिकैकशतं नाटकानि षड्भागेन विभक्तानि सन्ति। यथा –

- **ऐतिहासिकनाटकानि–** सुभाषविजयम्, अमरवीरवृत्तान्तम्, वालेश्वरमहायुद्धम्, सुशीलविजयम्, आत्मनिवेदनम्, देशशत्रुनिपातनम्।
- **जीवनचरिताधारितनाटकानि–** श्रीसीतारामवीरभावम्, सिद्धसीताराम्, तैलङ्गवन्दनम्, भक्तहरिदासम्,

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

श्रीलोकनाथप्रकीर्त्तनम्, वीरवामा-चरणम्, भक्तरामप्रसादम्, श्रीगदाधरसम्भवम्, मातृदर्शनम्, पापिताडनम्, देशबन्धुप्रकीर्त्तनम्, वङ्गकीर्त्तिविधानम्, धर्मसंस्थापनम्, रघुनन्दनवन्दनम्, श्रीवोपदेववन्दनम्, विद्यासागरवन्दनम्, तर्काचार्यप्रवन्दनम्, तर्करत्नाभिवन्दनम्, श्रीजानकिनाथवन्दनम्, तपोवैभवम्।

- **आधुनिकविषयाधारितनाटकानि–** विषयकाङ्क्षणम्, मातृहननम्, जननीश्राद्धवासरम्।
- **अनूदितानि नाटकानि–** गुप्तधनम्, सम्पत्तिसमर्पणम्, मुकुटम्, व्यवधानम्, सोपानवचनम्, रासमणिपुत्रम्, रहमतखानवृत्तान्तम्, श्रीनलिनपराभवम्, पुत्रयज्ञम्, पुत्रप्रत्यावर्त्तनम्, वार्त्तागृहाध्यक्षवचः, रोगिबान्धवम्, आनन्दमठम्, प्रतिशोधपरिग्रहम्, सुमतिलाभम्, चिकित्सासङ्कटम्।
- **अर्धैतिहासिकविषयाधारितनाटकानि–** श्रीवाल्मीकित्वलाभः, कालिदासः, भर्तृहरिवैराग्यलाभम्, नृपपुरप्रवेशम्, देशरक्षणम्, तपोनाशनम्, उपाधिलाभः, वेतालमिलनम्, धूर्त्तच्छलम्, सत्यकामवृत्तम्, आत्मविवेकलाभम्, विल्वमङ्गलमङ्गलम्, भारवाहिजनार्दनम्, विद्वद्दम्भविनाशनम्, जामात्रभ्यर्थनम्, कौलिन्यपरिरक्षणम्।
- **पौराणिकविषयाधारितनाटकानि–** श्रीरघुजन्मवृत्तान्तम्, जरत्कारुनिर्याणम्, महिषासुरलाञ्छनम्, प्रह्लादविनोदनम्, ध्रुवप्रसादनम्, तपोबलम्, मनःप्रसादनम्, शिवप्रसादनम्, श्रीकृष्णाविर्भावम्, कर्णजीवनम्, घटोत्कचवधम्, जयद्रथवधम्, भार्गवदर्पनाशम्, सत्यनारायणाविर्भावम्, शनैश्चरार्चनम्, अकालबोधनम्, मातृपूजनम्, शुभचून्निप्रपूजनम्, ऋषिविवाहम्, अभिशापप्रदानम्, सर्पयज्ञनिवारणम्, परीक्षित्परिरक्षणम्, कंसवधम्, रक्तबीजवधम्, शुम्भनिशुम्भयातनम्, चण्डमुण्डविनाशनम्, गङ्गावतरणम्, वलिच्छलनम्, द्रौपदीमानरक्षणम्, पाण्डवपरिरक्षणम्, भागवतचरणामृतम्, वालिवधम्, सत्यरक्षणम्, सत्यव्रतधरम्, शनिप्रभावम्, शमनविजयम्, सर्वापत्तारकम्, भरतगुणवन्दनम्, रामानुगामिलक्ष्मणम्, सीताहरणम्, सीतोद्धारम्, भीष्मत्वलाभः, अज्ञातवासम्, गङ्गामाहात्म्यकीर्त्तनम्, चन्द्रमाहात्म्यकीर्त्तनम्।

नित्यानन्दस्मृतितीर्थरचितं 'कालिदासः' इति रूपकमष्टदृश्यविशिष्टम्। कालिदासस्य प्रसिद्धकिंवदन्तीमवलम्ब्य रूपकमिदं प्रणीतं नाट्यकारेण। पण्डितौ विष्णुदास-शिवदासौ मूर्खं कालिदासं नीत्वा राजकन्यया विद्यावत्या सह विवाहं कारयन्ति। परन्तु प्रथममिलनरात्रौ कालिदासः अपमानितोऽभवत्। ततः मुनेः भूमङ्गलस्य उपदेशेन वाग्देव्याः पूजां कृत्वा असौ काव्यशक्तिं प्राप्तवान्। अनन्तरम् 'अस्ति कश्चिद्वाग्विशेषः' इति उत्तरप्रदानेन विद्यावती-कालिदासयोः मिलनेन रूपकं सम्पन्नं जातमिति तु व्यायोगस्यास्य विषयः। कालिदासः इति तु एकः व्यायोगः। एतादृशं व्यायोगमवलम्ब्य लघुशोधप्रबन्धोऽयं विरच्यते। व्यायोगेऽस्मिन् व्यायोगलक्षणं कीदृशं प्रकटितं तत्तु लघुशोधप्रबन्धेऽस्मिन् आलोच्यते।

व्यायोगलक्षणम्—

दृश्य-श्रव्यत्वभेदेन काव्यं द्विविधम्। तथाह्युक्तं विश्वनाथपादैः— 'दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्'[1] इति। दृश्यकाव्यमिदं पुनः द्विविधम्—रूपकम् उपरूपकञ्च। तत्र रूपकेषु व्यायोगोऽन्यतमः। विश्वनाथकविराजेन तदीये साहित्यदर्पणे व्यायोगस्य विविधानि वैशिष्ट्यानि आलोचितानि। तेनोक्तम्—

'ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः।।
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः।।
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः'[2]।। इति।

◊ रामायणादिप्रसिद्धग्रन्थेभ्यः गृहीतं भवति व्यायोगस्य इतिवृत्तम्।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

- ◊ व्यायोगे स्वल्पसंख्यकाः स्त्रीजनाः पुरुषाश्च बहुसंख्यकाः तिष्ठन्ति।
- ◊ व्यायोगो भवेत् गर्भविमर्शसन्धिविहीनः। अर्थादत्र मुख-प्रतिमुख-निर्वहणसन्धयः प्रयुक्ताः स्युः।
- ◊ व्यायोगो भवेत् एकाङ्कविशिष्टः।
- ◊ अत्र नायिकां केन्द्रीकृत्य युद्धं वर्णितं भवेत्।
- ◊ व्यायोगः स्यात् कैशिकीवृत्तिरहितः।
- ◊ नायकश्च धीरोद्धतप्रकृतिसम्पन्नः कश्चित् राजर्षिः दिव्यपुरुषो वा भवेत्।
- ◊ रसेषु हास्य-शृङ्गार-शान्तरसव्यतिरेकेण अन्याः रसाः भवन्ति व्यायोगस्य अङ्गिरसाः। व्यायोगस्य प्रकृष्टमोदाहरणं 'सौगन्धिकाहरणम्' इति।

व्यायोगलक्षणसङ्गतिः—

'कालिदासः' इति व्यायोगे साहित्यदर्पणस्थितानि व्यायोगवैशिष्ट्यानि कीदृशं प्रकटितं तत्तु अधस्तादालोच्यते—

- ◊ 'कालिदासः' इति व्यायोगस्य इतिवृत्तं प्रसिद्धकिंवदन्तीमवलम्ब्य रचितम्।
- ◊ व्यायोगस्य लक्षणानुसारमत्र स्वल्पसंख्यकानि स्त्रीचरित्राणि, बहुसंख्यकानि च पुरुषचरित्राणि सन्ति।
- ◊ व्यायोगोऽयं न तु एकाङ्कविशिष्टः। वस्तुतः व्यायोगेऽस्मिन् अङ्कस्य प्रयोगो नास्ति। अत्र अष्ट दृश्यानि वर्तन्ते।
- ◊ नायिकां केन्द्रीकृत्य युद्धस्य वर्णना अत्र नोपलभ्यते।
- ◊ व्यायोगस्य लक्षणानुसारं 'कालिदासः' इति व्यायोगः कैशिकीवृत्तिरहितः। 'शृङ्गारे कौशिकी'[3] इति तु विश्वनाथमतम्। अर्थात् कैशिकीवृत्तिः शृङ्गाररसेऽस्ति। परन्तु व्यायोगेऽस्मिन् शृङ्गारस्य लेशोऽपि नास्ति। अतो व्यायोगस्य लक्षणमत्र सङ्गतम्। पुनश्च विश्वनाथमते सूक्ष्मवेषभूषामण्डितनायिकायुक्ता, बहुस्त्रीजनसम्पन्ना, प्रभूतनृत्यगीतयुक्ता खलु कैशिकीवृत्तिः। अस्यां वृत्तौ कामोपभोगः विलासश्च वर्णितो भवति। परन्तु कैशिकीवृत्तेः एतादृशानि वैशिष्ट्यान्यपि व्यायोगेऽस्मिन् न दृश्यन्ते।

वृत्तिस्तु चतुर्विधा भवति,- कैशिकी (कौशिकी), सात्त्वती, आरभटी भारती च। कैशिकीवृत्तिं विहाय अन्याः वृत्तयोऽत्र (सात्त्वती, आरभटी भारती च) प्रयुज्यन्ते। आरभटी भारती च वृत्तिद्वयं व्यायोगेऽस्मिन् दृढतया प्रकटितमस्ति। आरभटीवृत्तेः लक्षणं विश्वनाथेनोक्तम्—

'मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता'[4]।। इति।

आरभटीवृत्तिः माया-इन्द्रजाल-युद्ध-क्रोधोन्मत्तता-उद्भ्रान्तादियुक्ता भवति। अपि च कपटत्वं, मिथ्याभाषणं, दाम्भिकत्वं, वञ्चना चेत्यादिवैशिष्ट्यान्यपि सन्ति आरभटीवृत्तौ। रौद्ररसे वीभत्सरसे च वृत्तिरियं प्रयुक्ता भवति। व्यायोगेऽस्मिन् राजकन्यां प्रति कालिदासस्य कपटत्वं मिथ्याभाषणञ्च प्रकाशितम्। विद्यावत्याः वचनेन तत्तु स्पष्टम्—

'अशुद्धभाषणं ह्यस्य छलनं किं मया सह।
अथवा मूर्ख एवायं वञ्चितैतेन तैर्ह्यहम्'[5]।। इति।

पुनश्च व्यायोगेऽस्मिन् विद्यावत्याः दाम्भिकत्वमपि प्रवलतया प्रकटितम्। विषयेऽस्मिन् कालिदासमुद्दिश्य राजकन्यायाः विद्यावत्याः एका उक्तिस्तु— 'स मया पदाहतस्ताडितः'[6] इति। एवम्प्रकारेण 'कालिदासः' इति व्यायोगे आरभटीवृत्तिः प्रकाशिता।

पुनश्च व्यायोगेऽस्मिन् भारतीवृत्तिरपि परिलक्ष्यते। भारतीवृत्तेः लक्षणप्रसङ्गे विश्वनाथेनोक्तम्— 'भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः'[7] इति। भारतीवृत्तिस्तु संस्कृतबहुला। परन्तु प्राकृत-अपभ्रंशादयः भाषाः अपि प्रयुज्यन्तेऽत्र। वृत्तिरियं पुरुषप्रधाना, न तु स्त्रीवर्जिता। अत्र वाचिकाभिनयस्य प्राधान्यं वर्तते। पुनरपि वृत्तिरियं सर्वेषु रसेषु प्रयुक्ता भवति। उक्तञ्च साहित्यदर्पणे— 'वृत्तिः सर्वत्र भारती'[8] इति। नाटकस्य प्रस्तावनांशस्य वृत्तिस्तु भारती। नाटके पूर्वरङ्गविधानात् परं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

भारतीवृत्तिमाश्रित्य स्थापकैः कविनामपरिचयादिकं प्रकाशनीयम्। कदाचित् कापि ऋतुवर्णनापि अनया वृत्त्या विधीयते।

'कालिदासः' इति व्यायोगस्य प्रस्तावनांशः भारतीवृत्त्या रचितः। यतो हि प्रस्तावनेयं पुरुषप्रधाना संस्कृतप्रधाना च। अत्र प्रथमदृश्ये सूत्रधार-पारिपार्श्विकयोर्मध्ये संस्कृतभाषया संलापः प्रचलति। पुनश्चात्र पूर्वरङ्गविधानात् परं भारतीवृत्तिमाश्रित्य सूत्रधारेण काव्यस्य नामकीर्तनं क्रियते। यथा पारिपार्श्विकमुद्दिश्य सूत्रधारेणोक्तम्— 'किं न ज्ञायते भवता कालिदासस्य कवित्वप्राप्तिकथा ?'[9] इति।

पुनश्च दृश्येऽस्मिन् वसन्तवर्णनापि परिलक्ष्यते। तथाहि सूत्रधारेणोक्तम्—

'किं दृष्टो भवता वसन्तसमागमः। पश्यतु—

सर्व्वो वृक्षः कुसुमनिचयैः शोभमानो विभाति
मन्दं मन्दं वहति पवनो दक्षिणस्या दिशोऽद्य।
आरक्ताभा नवकिसलया मानसं नो हरन्ति
पुष्पे पुष्पे जलधरणिजे गुञ्जतेऽद्य द्विरेफैः'[10]।। इति।

एवम्प्रकारेण व्यायोगेऽस्मिन् भारतीवृत्तिः प्रयुक्तास्ति।

- ◊ व्यायोगस्य नायकः कालिदासः न तु राजर्षिः, न च दिव्यपुरुषः। परन्तु नायकस्य साधारणवैशिष्ट्यानां प्रायश एव (कृती, रूपयौवनोत्साही, दक्षः, अनुरक्तलोकः, तेजः, वैदग्ध्यशीलवान् च) तस्मिन् कालिदासे उपलभ्यते। कश्च गुणसम्पन्नो जनः नायको भवति तत्तु साहित्यदर्पणे उच्यते—

'त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता'[11]।। इति।

नायकस्तु चतुर्विधः, यथा—धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तश्च। चतुर्विधेषु नायकेषु व्यायोगस्यास्य नायकः कालिदासस्तु धीरप्रशान्तः नायकः इति वक्तुं शक्यते। धीरप्रशान्तस्य लक्षणमुक्तं विश्वनाथेन—

'सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्'[12]। इति।

नायकस्य सामान्यगुणानि कालिदासे वर्तते, पुनश्च व्यायोगानुसारं कालिदासोऽयं जात्या ब्राह्मणः। अतः कालिदासः धीरप्रशान्तः नायकः।

व्यायोगस्य वैशिष्ट्यानुसारं व्यायोगस्य नायकः धीरोद्धतो भवेत्। परन्तु व्यायोगेऽस्मिन् नायके कालिदासे धीरोद्धतस्य वैशिष्ट्यमेकं युक्तियुक्तमस्ति। तत् वैशिष्ट्यं 'मायापरः' इति। 'मायापर' इत्यस्यार्थः प्रतारकः। कालिदासमुद्दिश्य राजकन्यायाः विद्यावत्याः वचनेन तत्तु स्पष्टम्—

'विबुधस्य हि वेशेन चागत्यात्र नृपालये।
वञ्चने संप्रवृत्तोऽसि धिक् त्वां मूर्खतमं नृषु।।
प्रवञ्चक। शीघ्रमपसर मद्गेहात्'[13]। इति।

व्यायोगेऽस्मिन् मुख्यतः करुणरसः एव अङ्गिरसः एवमेव वक्तुं शक्यते। अन्ये रौद्र-भयानक-अद्भुत-शान्तादयः रसाः अङ्गरसरूपेण विराजन्ते।

Endnotes

1. सा.द.- ६/१, पृ. ३१९
2. सा.द.- ६/२३१,२३२,२३३, पृ. ४३६
3. तत्रैव- ६/१२२, पृ. ३९२
4. सा.द.- ६/१३२,१३३, पृ. ३९८
5. कालि.- पञ्चमदृश्यम्, पृ. १७
6. तत्रैव- पृ. १९

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

7. सा.द.- ६/२९, पृ. ३३३
8. तत्रैव- ६/१२२, पृ. ३९२
9. कालि.- प्रथमदृश्यम्, पृ. ३
10. तत्रैव-श्लोकः २, पृ. १,२
11. सा.द.- ३/३०, पृ. ९६,९७
12. सा.द.- ३/३४, पृ. ९८
13. कालि.- पञ्चमदृश्यम्, पृ. १८

Bibliography

- कृष्णमोहनशास्त्री, आचार्यः (सम्पा.)। *साहित्यदर्पणः (सटिप्पण 'लक्ष्मी' व्याख्याविभूषितः)*। चौखम्भा संस्कृत संस्थान, वाराणसी, पुनर्मुद्रितः, २०१८।
- दाशः, नारायणः। *संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्*। कथाभारती, कलिकाता, प्रथमसंस्करणम्, २०१३।
- श्रीनित्यानन्दस्मृतितीर्थः। *कालिदासः (संस्कृतव्यायोगः)*। हाओडासंस्कृतसाहित्यसमाज, हाओडा, १३६३ वङ्गाब्द।